Gyanshauryam, International Scientific Refereed Research Journal
© 2021 GISRRJ | Volume 4 | Issue 2 | ISSN : 2582-0095

# विवाहप्रश्नविचारः

**प्रो.प्रभातकुमारमहापात्रः**
**ज्योतिषविभागाध्यक्षः, श्रीरणवीरपरिसरः, जम्मूः**

**Article Info**
Volume 4 Issue 2
Page Number : 199-208
**Publication Issue :**
March-April-2021
**Article History**
Accepted : 02 March 2021
Published : 15 March 2021

**शोधसारांशः-** लग्नेशसप्तमेशौ मित्रग्रहैः शुभग्रहैश्च दृष्टौ स्यातां तथा चन्द्रः कम्बूलयोगान्वितः स्यात्तदा स्त्रीपुंसयोः वैवाहिकजीवनं सुखमयं भवति। यदि सप्तमेशः लग्ने तिष्ठति चेत्तदा स्त्री सदैव पत्याज्ञा पालयति। यदि लग्नेशः सप्तमभावे तिष्ठति चेत्तदा पुरुषः पत्न्याज्ञा पालयति। यदि लग्नेशः लग्ने एवं सप्तमेशः सप्तमे स्थितः अथवा द्वौ लग्नेशसप्तमेशौ लग्ने स्थितौ अथवा द्वौ सप्तमभावे स्थितौ स्यातां तदा पतिपत्नीमध्ये परस्परं प्रेमातिरेकं भवति।

**मुख्यशब्दाः-** विवाहप्रश्नः, चन्द्रः, वैवाहिकजीवनम्, सुखमयम्, लग्नेशः, पुरुषः।

न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते इत्यादिना प्राचीनकालिकसमाजे नारीणां प्राधान्यं कियदासीत् तज्ज्ञातुं शक्यते। वस्तुतस्तु मानवस्य त्रिवर्गसाधिका भार्या एव भवति। विवाहं विना मानवजीवनस्य सम्पूर्णता न भवति । तदर्थं भार्या अर्धाङ्गिनी इति उच्यते। तां विना पुरुषस्य धर्म-अर्थ-कामेषु गतिरपि न भवति। सन्तानोत्पत्तये, संस्कारसंरक्षणाय च भार्याया आवश्यकता भवत्येव। तदर्थं विवाहस्य प्रयोजनं सर्वैरङ्गीक्रियते। प्रश्नमार्गे एवं वर्णितमस्ति यत् -

**श्रौतं स्मार्तं च सर्वगृहिषु च नियतं कर्मजातं यतोऽतः ।**

**कर्त्तव्या स्यादवश्यं परिणयनविधिः कर्मणो चात्मजास्यै।**[1]

परन्तु पुरुषः यदा एकाम् उत्तमगुणयुक्तां कन्यां प्राप्नोति, तदा तस्य उपर्युक्तस्थलेषु गतिर्भविष्यति इति। तदर्थं ज्योतिषशास्त्रे वरकन्ययोः चयनार्थं विवाहावसरे आदौ मेलापकविचारः क्रियते। तस्य मेलापकस्यावश्यकताविषये मुहूर्तचिन्तामणौ विवाहप्रकरणे एवमुक्तं विद्यते यत् -

**भार्या त्रिवर्गकरणं शुभशीलयुक्ता शीलं शुभं भवति लग्नवशेनतस्याः ।**

**तस्माद्विवाहसमयः परिचिन्त्यते हि तन्निघ्नतामुपगताः सुतशीलधर्माः।।**[2]

अर्थादुत्तमशीलस्वभावयुक्ता पत्नी धर्मस्य, अर्थस्य कामस्य च कारणं भवति। शुभलग्नम् एवञ्च कन्यायाः ग्रहनक्षत्राणामाधारेण तस्याः शील-स्वभाव-दाम्पत्यप्रीति-सन्तान-भाग्यप्रभृतीनां निर्णयः ज्योतिषशास्त्रे विदितोऽस्ति। तदर्थं विवाहसमये कन्यायाः लग्नग्रहनक्षत्राणां विचारः क्रियते। कदाचित् दुष्टस्वभावयुक्तया कन्यया सह विवाहो भवति चेज्जीवनं नष्टं भविष्यति। तदर्थ वरकन्ययोः नक्षत्रमेलापकस्यावश्यकता वर्तते।

प्रायशः विवाहप्रश्नविचारे ग्रहयोगवशात् विवाहकारकयोगः, स्त्रीलाभयोगः, शीघ्रविवाहयोगः, बिलम्बितविवाहयोगः, विवाहप्रतिवन्धकयोगः, विवाहदिक् निरूपणम्, विवाहकालनिरूपणम्, कलत्रसंख्यानिरूपणम्, भार्यायाः शुभाशुभलक्षणम्, विवाहात्परं भाग्योदयः प्रभृतयः योगाः विचार्यन्ते। एते योगाः प्रश्नायनेऽपि परिलक्ष्यन्ते। परन्तु एतैः सह शकुनवशात्,

**Copyright: ©** the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

स्वरवशात्, स्पर्शवशाच्च विवाहप्रश्नस्य समाधानं कथं प्रदेयम् इति तस्य विचारोऽपि परिलक्ष्यते। यद्यपि प्रश्नमार्गे क्रमोऽयं परिलक्ष्यते तथापि इतरप्रश्नशास्त्रापेक्षया प्रश्नायनस्य इयं विचारधारा अस्य वैशिष्ट्यं प्रतिपादयति।

**विवाहप्रश्नस्योद्देश्यम्-** विवाहावसरे वरपक्षतः कन्यापक्षतः च उभयोः वरकन्ययोः जन्माङ्गचक्रयोः मेलापकं विचार्यते । प्रश्नशास्त्रेऽपि विवाहविचारः सम्यक्तया प्रतिपादितोऽस्ति । इयं कन्या अनेन वरेण सह विवाहं करोति चेत् तस्याः वैवाहिकजीवनं कथं भविष्यतीति ज्ञानार्थम् आदौ विवाहप्रश्नविचारः क्रियते । अर्थात् अनया कन्यया सह अस्य वरस्य विवाहः भवति चेत्सा कन्या सुखिनी, सौभाग्यवती, पुत्रवती भवति न वा इत्येव विवाहप्रश्नस्य आवश्यकता शास्त्रे विद्यते। तथा चोक्तम् प्रश्नायने –

**विवाहविषये प्रश्न एषः कीदृग् भविष्यति ।**

**जिज्ञासा यदि चेतर्हि तत्प्रकारोऽथकथ्यते ॥**

**कन्यकेयमनेनोढा भर्तृपुत्रादिसंयुता ।**

**भविता किन्नु किन्नो वा विवाहप्रश्नइदृशः॥**[3]

विवाहप्रश्नावसरे कन्यापुरुषयोः नक्षत्रनामान्युत्क्त्वा प्रश्नकर्मणः प्रारम्भः क्रियते । वैवाहिककर्मणि वध्वाः प्राधान्यता एव स्वीक्रियते न तु वरस्य । तदर्थं प्रश्नविचारावसरे आरूढात् वध्वाः चिन्तनं कार्यमिति शास्त्रनिर्देशः । पुनश्च तस्मात् सप्तमस्थानात् वरस्य विचारः करणीयः । प्रश्नायनस्य सप्तमायनस्य प्रथमश्लोके एतदेव उक्तं विद्यते । तद्यथा –

**प्रश्ने वैवाहिके वध्वाः वरस्याप्युडुनामनी ।**

**उत्तवारूढात् कन्यकाया द्यूनाल्लक्ष्म वरस्य च॥**[4]

प्रश्नमार्गेऽपि एतदुक्तं विद्यते यत् –

**वध्वा वरस्याप्युडुनाम चोत्तवा प्रश्नस्तथाप्येष वधूप्रधानः ।**

**लग्नात्ततोऽस्या मदतश्च पत्युर्वाच्यं हि लक्ष्मेह गुरुस्तथाऽऽह ॥**

**एवं भर्तुस्वभावदिवयोगुणसुखादि च ।**

**सप्तमर्क्षाद् भवन्त्येवं लग्नात्कन्यागुणादयः॥**[5]

वस्तुतस्तु प्रश्नशास्त्रस्यान्ये ग्रन्थाः विद्यन्ते चेदपि प्रश्नायनवत् तेषु विषयविस्तारः नास्ति । अर्थादत्र ये विचाराः दृश्यन्ते ते प्रश्नशास्त्रस्य प्रायशः प्रत्येकं विन्दुं स्पृशन्तीति निःसन्देहेन वक्तुं शक्यते । प्रत्येकं प्रश्नस्य सूक्ष्मविचारा अत्र विद्यन्ते । उदाहरणं दैवज्ञः विवाहप्रश्नविचारावसरे विवाहसमये रोगाणां, विघ्नानां, वध्वाः व्यभिचारिणीत्वं, सच्चरित्रादि ज्ञानमपि कर्तुं शक्नोति । तथा चोक्तम् –

**नीचार्यन्तेषु पापास्तैर्दृष्टा विघ्नोऽरिगा रुजा ।**

**बन्धुभिर्वा रते व्यादेर्दृष्टे जारवती बधूः॥**[6]

अर्थात् पापग्रहैः दृष्टाः पापाः नीचारिक्षेत्रगताश्चेत् विवाहसमये विघ्नः भवितुमर्हतीति ज्ञातव्यम् । पुनश्च पापैः दृष्टाः ग्रहाः षष्ठभावगताश्चेत् विवाहसमये वधूवरयोर्मध्ये कस्यापि एकस्य रोगः भवेदिति ज्ञातव्यम् । एवञ्च प्रश्नसमये पशुपक्षिणां मैथुनं दृश्यते चेद् वधूः व्यभिचारिणीति ज्ञातव्यम्।

**विवाहविचारे आयुषः प्राधान्यम् ।**

प्रायः विवाहप्रश्नविचारावसरे सप्तमभावे शुभग्रहस्थितिः शुभफलं प्रयच्छति । परन्तु आयुः पूर्वं परीक्षेत इत्यादिना आयुर्विचारो विवाहात्प्राक् वरकन्ययोः करणीयः । आयुर्निरूपणात् परं तेषां वैवाहिकसुखसन्तानादयः विचारणीयाः। तथा च प्रश्नमार्गे –

**कन्यायाः पुरुषस्य च प्रथमतो निर्णीय चायुः पुनः**

**सन्तानाख्यतिथिं ततश्च सकलं दैवज्ञवर्यस्ततः ।**

**भाविप्रश्नविलग्नतोऽपि निखिलं पाणिग्रहं कारयेत्**

**सन्तानाय यतः प्रयाति नितरां प्रीतिं पितृणां गणाः।।**[7]

प्रसङ्गेऽस्मिन् वरकन्ययोः मातापित्रोः आयुर्विचारः प्रश्नायने लिखितमस्ति। यथा –

**नीचारिगार्कचन्द्रेक्षा लग्ने द्यूने क्रमात् स्त्रियः ।**

**पुंसः पिता न माता न चिन्त्यतामन्यकारकैः।।**[8]

अर्थात् प्रश्नकुण्डल्यामथवा आरूढचक्रे सूर्यः नीचराशौ शत्रुराशौ वा भूत्वा लग्नमथवा आरूढराशिं न पश्यति चेत् कन्यायाः पिता नास्तीति ज्ञेयम् । तथा च नीचराशिगतः अथवा शत्रुक्षेत्रस्थः चन्द्रः लग्नमथवा आरूढराशिं न पश्यति चेत् कन्यायाः माता नास्तीति ज्ञातव्यम् । वरस्यापि एवमेव विचारः करणीयम् । परन्तु किञ्चिदेव भिन्नं तत्र परिलक्ष्यते । कन्याविचारे आरूढात् विचारः विधीयते । वरविचारे तु तस्मात् सप्तमस्थानात् विचारः स्वीक्रियते । यथा नीचशत्रुराशिगतः सूर्यः प्रश्नकुण्डल्याम् एवञ्च आरूढराशेः सप्तमस्थानं प्रति न पश्यति चेत् वरस्य पिता नास्तीति ज्ञातव्यः । तथैव नीचस्थः शत्रुस्थानगतः चन्द्रः सप्तमभावं न पश्यति चेत् वरस्य माता नास्तीति ज्ञेयम् । तथा चोक्तं प्रश्नमार्गे –

**यदि नीचारिगो लग्नमारूढं वा न पश्यति ।**

**अर्कास्त्रियः पिता नास्ति मातेन्दुश्चेत्तथाविधः ।।**

**लग्नरूढर्क्षयोरस्तं यदार्कः शत्रुनीचगः ।**

**न पश्यति पिता पुंसो नास्ति माता शशी यदि।।**[9]

विवाहसम्बद्धविचारः –विवाहविचारे कस्यां स्थितौ विवाहो न भवति इत्यस्मिन् प्रसङ्गे पुरुषोत्तमो वदति यत् कृष्णपक्षे प्रश्नलग्नात् युग्मराशौ स्थितश्चन्द्रः यदि पापग्रहेण दृष्टः अथवा अष्टमस्थानगतश्चेत् वैवाहिकसम्बद्धः (यत् हिन्दीभाषया सगाई इति उच्यते) न भविष्यतीति ज्ञेयम्। विषयोऽयं प्रश्नसंग्रहे बृहस्पतिना उक्तः विद्यते इति प्रश्नमार्गे दत्तं विद्यते। प्रश्नायनेऽपि अयं श्लोकः अपरिवर्तिततया परिलक्ष्यते। यथा –

**प्रश्नलग्नाद्युग्मराशौ कृष्णपक्षे यदा विदुः ।**

**पापैर्दृष्टोऽथवा रन्ध्रे नैव सम्बन्धमाप्नुयात्।।**[10]

**स्पर्शवशाद्विवाहविचारः।**

स्पर्शवशात् विवाहप्रश्नविचारः कथं करणीयः इत्यस्यालोचनं क्रियते अत्र। तद्यथा यदि पृच्छकः स्वदक्षिणबाहुः, वक्षः, शिरश्च प्रश्नसमये स्पृशति चेत् विवाहप्रश्नस्य सिद्धिरिति वाच्यम् । तथा च जानुपादयोः स्पर्शनं प्रश्नसमये करोति चेत् विलम्बेन सिद्धिर्भविष्यतीति ज्ञेयम्। एवञ्च कटिं पृष्ठभागं च संस्पृश्य प्रश्नं करोति चेद्विवाहार्थं विघ्नमिति वक्तव्यम् । तथा च –

**स्पर्शो दक्षिणबाहूरः शिरसां जानुपादयोः ।**

**सिद्धिर्विलम्बोऽन्यहस्ते कटौ पृष्ठे च विघ्नकृत्।।**[11]

तथा च प्रश्नमार्गे –**स्पर्शो दक्षिणबाहूवक्षशिरसां पाणिग्रहे सिद्धिकृ-**

**ज्जान्वङ्घ्रयोऽस्तु विलम्बकृत्परकरे पृष्ठे कटौ विघ्नकृत्।।**[12]

**प्रश्नकालिकस्वरवशाद् विवाहविचारः।**

प्रतिदिनं सूर्योदयात्पूर्वं स्वरस्य परीक्षणमवश्यं करणीयम्। श्वरज्ञानाय श्वाससम्बन्धीनः इडा-पिंगला-सुषुम्नानाडीनां गतिः तत्र पृथ्वीजलादितत्त्वानां संचारश्च विज्ञायताम्। तेन स्वरज्ञानेन स्वस्य सकलं शुभाशुभं तथा पृच्छकस्य नष्टादिद्रव्याणां प्राप्तिरपि वक्तव्यम्। तत्रापि वामश्वरः इडा, दक्षिणश्वरः पिंगला, उभयदक्षिणवामश्वरः सुषुम्ना इति नाड्या ख्यातः। यथोक्तं प्रश्नमार्गे –

**कार्यं श्वासपरीक्षणं प्रतिदिनं बुध्वा प्रभातागमे**

**तस्येडादिगतिर्द्धराप्रभृतिसंचारश्च विज्ञायताम्।**

**तेनात्मीयशुभाशुभं हि सकलं ज्ञेयं पुनः पृच्छतां**

**तत्कालात्मसमीकरणेन च तथा नष्टादिकं चोच्यताम्।।**[13]

यदि सोम-बुध-गुरु-शुक्रवासरेषु अन्यतमे वासरे वामश्वरः चलति तथा मङ्गल-शनि-रविवासरेषु अन्यतमे वासरे दक्षिणश्वरः चलति तदा प्रष्टुः शुभप्रदो भवति। परन्तु शुभग्रहाणां वासरे दक्षिणश्वरः पापग्रहाणां वासरे वामश्वरः अशुभफलप्रदायको भवति। शुभग्रहाणां वासरे प्रवाहितः वामश्वरः, पापग्रहाणां वासरे दक्षिणस्वरः शरीरस्वस्थतां, धनलाभं, मधुरभोजनम्, अभीष्टकार्यसिद्धिञ्च करोति। एतद्भिन्नस्वरचलने मधुरभोजनं धनलाभः, सुखेन शयनञ्च न जायते, तदा सर्वैः साकं कलहः, मलसम्बन्धीकष्टश्च जायते। यथोक्तम् –

**वारेष्विन्दुबुधाङ्गिरो भृगुभुवां वामे चरन् मारुतो**

**भौमार्कार्किदिनेषु दक्षिणगतो नृणामभीष्टः स्मृतः।**

**सौम्यानां दिवसेषु दक्षिणगतोऽनिष्टो सतां वामगो**

**वक्ष्यन्ते मरुतोः शुभाशुभदयोर्भेदाः फलानामथ।।**

**सर्वेषामपि वासरेषु पवनेऽभीष्टे वपु स्वस्थता**

**लाभोऽर्थस्य च मृष्टभोजनमितीष्टानामभावोऽन्यथा।**

**श्वासश्चेदहितो न मृष्टमशनं नार्थागमो विग्रहः**

**सर्वैर्नो शयनं सुखेन च सुखं विण्मोक्षणादिष्वपि।।**[14]

तत्रापि कथ्यते – यदि श्वासस्य प्रतिकूलता रविवासरे स्यात्तदा वपुर्वेदना, सोमवासरे कलहः, भौमवासरे मृत्युः दूरदेशे यात्रा च, बुधवासरे राज्यशासने क्लेशः, शुक्रवासरे प्रत्येककार्ये असिद्धिः, शनिवासरे स्ववीर्यकृषिनाशो विवादादयश्च जायन्ते। एवं यदि रविवासरात् अष्टदिनं यावत् निरन्तरं वामश्वरः चलति चेत्तदा गुरोः मृत्युः गम्भीरव्याधिश्च जायते। एवं सोमवासरादष्टदिनं यावत् दक्षिणश्वरचलनेन पुत्रापत्तिः, भौमवासरादष्टदिनं यावत् वामश्वरचलनेन शत्रुणा बन्धनम्, गुरुबुधयोः वासरादष्टदिनं यावत् दक्षिणस्वरचलने गुरोः स्वस्य च मृत्युः, शुक्रस्य वासरादष्टदिनं यावत् दक्षिणश्वरः चलति चेत्तदा भूमिविवादेन धननाशः, शनिवासरात् वामस्वरः चलति चेत्तदा स्त्रीनाशश्च जायते।अथ श्वासस्य प्रमाणेन तस्य पृथिव्यादिसंचारस्तत्फलं चोच्यते – पृथ्वीतत्वस्य षोडशाङ्गुलदैर्घ्यात्मकः, जलतत्वस्य द्वादशाङ्गुलदैर्घ्यात्मकः, अग्नितत्वस्य अष्टाङ्गुलात्मकः, वायुतत्वस्य षडाङ्गुलात्मकः, आकाशतत्वस्य त्र्याङ्गुलात्मकश्च श्वाससंचारो भवति।

**विवाहसम्भवासम्भवज्ञानम्।**

यदि प्रश्नलग्नादुपचयस्थाने शुक्रः सप्तमेशो वा तिष्ठति चेत् तद्विवाहः सुखसमृद्धिकारको भवति। पङ्क्तीयं प्रायशः प्रश्नग्रन्थे कथिता। अस्मात् योगादेतदपि ज्ञायते यतथ विवाहात् परं नवदम्पत्योः शीघ्रसन्तानलाभः भविष्यतीति। तथा च प्रश्नायने –

**लग्नादुपचयर्क्षस्थौ शुक्रास्तेशौ समृद्धिदौ ।**

**विवाहोत्तरकाले तु सुतादावप्ययं विधिः।।**[15]

यदि लग्नेशसप्तमेशौ अथवा लग्नेशशुक्रौ परस्परस्थानसंस्थितौ अथवा मित्रगृहगतौ अथवा उच्चस्थानगतौ अथवा परस्परयुतौ दृष्टौ वा स्यातां तर्हि विवाह अवश्यमेव भविष्यतीति ज्ञेयम्। तथा च प्रश्नायने-

**द्युनेशशुक्रौ तनुपो मिथो गृहगतेक्षिताः ।**

**उच्चे सुर्हहे सिद्धिस्तनुपेनान्ययोजना।।**[16]

एतत् प्रश्नमार्गेऽपि उक्तं विद्यते । यथा -

**वेश्मस्थौ तु मिथस्सुहृद् भवनगौ यद्वोच्चगौ वेक्षितौ**

**युक्तौ वा मदलग्नपौ तनुपशुक्रौ चात्र सिद्धिप्रदौ।।**[17]

यदि तृतीय-सप्तम-एकादश-पञ्चम-षष्ठस्थानस्थः चन्द्रः रविणा बुधेन गुरुणा वा अवलोकितश्चेत् तत्र विवाहकारकः योगः अस्तीति ज्ञातव्यः। अथवा गुरुः, बुधः, शुक्रः, चन्द्रश्च यदि लग्नात् केन्द्रे त्रिकोणे वा भवन्ति चेत् तत्रापि विवाहकारकः योगः अस्तीति ज्ञातव्यम् । प्रश्नभूषणे उक्तं विद्यते यत् -

**त्रिसप्तमायपञ्चमारिभावगो निशाकरो**

**रविज्ञजीवविक्षितो विवाहकारको भवेत् ।**

**त्रिकोणकेन्द्रगा गुरुज्ञशुक्रशीतभानवो**

**यदीह लग्नतो भवन्ति वा विवाहकारकाः।।**[18]

''लग्नधर्मात्मजास्तान्ता सौम्येक्षादैः शुभप्रदाः'' इत्यादिना लग्न-नवम-पञ्चम-सप्तम-अष्टमस्थानं प्रति शुभग्रहाणां दृष्टिः भवति चेत् तत् शुभफलदायकयोगः भवति।

मम विवाहो भविष्यति न वा इति विषयकचिन्तने प्रश्नकाले चन्द्रः यदि लग्नात् तृतीये पञ्चमे षष्ठे सप्तमे एकादशे वा भावे स्थितः शुभग्रहेण दृष्टः स्यात्तदा विवाहः भविष्यतीति दैवज्ञः निर्दिशेत्। तथैव शुभग्रहाः केन्द्रत्रिकोणसंस्थाः स्युस्तदा विवाहयोगः जायते। यथोक्तम्

**गुरुरविसौम्यैर्दृः त्रिसुतमदायारिगः शशिलग्नात्।**

**भवति च विवाहकर्त्ता त्रिकोणकेन्द्रेषु वा सौम्याः।।**[19]

विवाहप्रश्ने लग्नात् प्रथमसप्तम-एकादशदशमभावेषु अन्यतमे स्थितः शुक्रः शुभग्रहेण दृष्टः स्यात्तदा विवाहे शोभनास्त्रियः प्राप्तिः भवति। प्रश्नकाले लग्नेशसप्तमेशौ द्वावपि स्वराशौ, स्वोच्चे वा स्थितौ परस्परं वीक्षितौ च स्यातां तदा लग्नेशः सप्तमभावे, सप्तमेशश्च लग्ने भवेत्तदापि शीघ्रिववाहो भविष्यतीति वदेत्। यथोक्तं प्रश्नभूषणे -

**शुक्रो विलग्नास्तभवास्यदस्थःशुभेक्षितः स्यात् शुभगाङ्गनाप्तये।**

**जाया त्रिलाभास्यदपञ्चमस्थश्चन्द्र शुभैर्दृष्टयुतोऽङ्गनाप्रदः।।**

**प्रश्नलग्नेशजायाधिपौ स्वर्क्षगौ उच्चभावस्थितौ ल्मिथो वीक्षितौ।**

**लग्नपः सप्तमे सप्तमेशो यदा लग्नगःसत्वरं यद्विवाहं वदेत्।**[20]

**''सौम्याः सितश्च केन्द्रे चेद् विवाहं क्षिप्रमादिशेत्''**[21]

यदि शुक्रः शुभग्रहाश्च केन्द्रे भवेयुस्तदापि शीघ्रिववाहयोगोऽस्तीति ज्ञातव्यम्। प्रश्नमार्गेऽपि शीघ्रिववाहः योगः वर्णितोऽस्ति। यदि द्वितीयतृतीयषष्ठसप्तमदशमेकादशभावेषु स्थितः चन्द्रः शुभग्रहेण दृष्टः अथवा मिथुनकुंभतुलाकन्याप्रभृतिषु अन्यतमलग्ने

सप्तमभावे सप्तमभावनवांशे वा स्थितः शुक्रः वा चन्द्रः तिष्ठति चेत् शीघ्रविवाहो वाच्यः। बृहत्पाराशरहोराशास्त्रेऽपि अयं विवाहप्रश्नविचारः प्रतिपादितः।

**विवाहसमयनिरूपणम्।**

**चन्द्रद्वादशभागत्रिकोणगेन्दौ विवाहससिंद्धिः ।**

**चन्द्राभिलाषभे वा लग्नद्यूनेशसंस्थितांशक्र्षे ।।**[22]

अर्थात् गोचरवशात् प्रश्नकालिकचन्द्रः अथवा जन्मकालिकचन्द्रः यदा द्वादशांशे त्रिकोणे वा आगछति, चेत्तदा विवाहो भविष्यतीति वाच्यम्। यदा चन्द्रः स्वाभिलाषराशौ गोचरवशात् आगच्छति तदा विवाहः भविष्यति। तथा च यदा आरूढलग्नं, प्रश्नलग्नं अथवा जन्मराशिः वा लग्नात् सप्तमेशः यस्मिन् राशौ विद्यते तद्राशौ यदा चन्द्रः गोचरवशात् आगच्छति तदा विवाहः भविष्यति।

जायाकारकसप्तमेशयोर्मध्ये यो बलवान् भवति तस्य दशान्तर्दशायां विवाहः भविष्यति। स्फुटलग्नेशसप्तमेशयोः योगराशिं यदा गुरुः गोचरवशात् सञ्चरति तदा विवाहः भवितुमर्हति। लग्नेशः यस्मिन् नवांशे भवति एवञ्च तस्याधिपः यस्मिन् राशौ वर्तते तस्मात् द्वितीयस्थानं चन्द्रः एवं गुरुः गोचरवशात् यदा सञ्चरतः तदा विवाहः भविष्यतीति ज्ञेयम् ।

जातकपारिजाते विवाहकाल एवं वर्णितोऽस्ति यत् लग्नेशसप्तमेशयोः स्पष्टराश्यादियोगतुल्यराशौ गोचरवशात् यदा बृहस्पतिः आगमिष्यति तदा विवाहः भविष्यतीति वाच्यम्। अथवा चन्द्राधिष्ठितस्य नक्षत्रस्य एवञ्च सप्तमेशस्य योगतुल्यांशे गुरुः भवति चेत् विवाहः वाच्यः। यथोक्तम् –

**कलत्रनाथस्थितभांशकेशयोः सितक्षपानानायकयोर्बलियसः ।**

**दशागमे द्यूनपयुक्तभांशकत्रिकोणगे देवगुरौ करग्रहः।।**[23]

प्रश्नायनस्य नवमायने विवाहकालः षड्त्रिंशत् श्लोकादारभ्य एकचत्वारिंशत् श्लोकाभ्यन्तरे वर्णितोऽस्ति। यथोक्तम् –

**शुभोऽस्तपो बली शुक्रः केन्द्रे बाल्ये विवाहदौ ।**

**लग्नपाढ्यावुपचये विवाहोर्ध्वं समृद्धिदौ ।।**

**लग्नपस्यान्तिकेऽस्तेशो लग्नस्य च शुभग्रहः ।**

**लग्नस्वास्ते शुभः सौम्यदृष्टो बाल्ये विवाहदः ।।**

**पारावतादिगेऽस्तेशे लग्नपे मृदुभागगे।**

**धननाथे बलाढ्ये च बाल्ये परिणयो भवेत् ।।**

**शुक्रश्चोपचयेऽस्तेशधनपौ लग्नपः शुभैः ।**

**दृष्टः शुभं भवेदूर्ध्वं विपरीते त्वथोह्यताम् ।।**

**अस्तस्थद्रष्टृनाथैतद्भांशपा लग्नपांशपः ।**

**शुक्रेन्दू राहुरेतेषां दशादिः काल इष्यते ।।**

**द्यूनतत्पतिगैतद्धीसमभे भृगुजन्मपौ ।**

**लग्नपश्चास्तपस्थर्क्षत्रिकोणे गुरुरेष च।।**[24]

''शुक्रोऽस्तपो वा तनुनाथभांशत्रिकोणमायाति तदा विवाहः'' इत्यादिना यस्मिन्नाशौ नवांशे वा लग्नेशः भवेत्तस्मात् त्रिकोणराशौ यदा गोचरवशात् शुक्रः अथवा सप्तमेशः आगच्छति तदा विवाहः भविष्यतीति वाच्यम्। लग्नात् सप्तमस्थः ग्रहः,

सप्तमभावं यः पश्यति सः एवञ्च सप्तमेशस्य दशान्तर्दशाकाले तथा लग्नेशः गोचरवशात् सप्तमस्थानं यदा आगच्छति तदा विवाहः भविष्यतीति ज्ञेयम्।

पुनश्च यस्मिन् राशौ सप्तमेशः भवति तस्य राश्यधिपतिः तथा च यस्मिन् नवांशे सप्तमेशः स्यात्तस्य स्वामी, अनयोर्मध्ये एवञ्च शुक्रचन्द्रयोर्मध्ये यः बली त्अस्य बलवतः ग्रहस्य दशान्तर्दशायाम् एवञ्च सप्तमेशस्थितनवांशराशितः त्रिकोणस्थाने यदा गोचरवशात् जीवस्य सञ्चारो भवति तदा विवाहः भविष्यतीति वाच्यम्।

**विवाहशुभाशुभफलनिरूपणम्।**

इयं कन्या वरमेष्यति? सौख्यमेति न वा? विवाहः भविष्यति न वा? इति प्रश्नानां समाधानमुक्तं प्रश्नवैष्णवे यत् –

**केन्द्रे लाभाष्टपुत्रस्थे चन्द्रे पापेत्थशालतः।**

**न भवेत्कन्यकालाभः पापैर्वा केन्द्ररन्ध्रगैः।।**

**लग्ने स्थिते लाभगते च जीवे पुंराशिलग्ने वरमेति कन्या।**

**लाभास्तगौ चन्द्रसितौ वधूनां वरप्रदौ सौम्ययुतेक्षितौ चिरात्।।**[25]

यदि प्रश्नकुण्डल्यां चन्द्रः केन्द्रेकादशपञ्चमभावेषु अन्यतमभावे स्थित्वा पापग्रहैः सह इत्थशालयोगेन युक्तः स्यात्तदा विवाहो न भवति। यदि उपर्युक्तस्थाने स्थितः चन्द्रः अष्टमभावे स्थितेन पापग्रहेण इत्थशालयोगमुत्पादयति तदाऽपि स्त्रीप्राप्तिं न भवति। यदि गुरुः लग्ने वा एकादशे स्यात्तथा लग्ने पुरुषराशिः (मेष-मिथुन-सिंह-तुला-धनु-कुम्भराशिषु अन्यतमः राशिः) विद्यते तदा कन्या उत्तमवरं प्राप्नोति। यदि चन्द्रशुक्रौ एकादशे वा सप्तमे स्थितौ शुभग्रहैः युतौ वीक्षितौ वा स्यातां तदा कन्या वरप्राप्तिं करोति।

तत्र पुनरपि विवाहे शुभयोगाः कथिताः। यदि गुरुबुधौ लग्नसप्तमपञ्चमस्थानेषु स्थितौ चेत्तदा कन्या पुत्रवती सुखी भवति। यदि शुभग्रहाः एकादशनवमपञ्चमधनकेन्द्रस्थानेषु स्थिताः स्युस्तदा कन्या पुत्रार्थसुखयुक्ता भवति। यथोक्तम् –

**जीवज्ञयोर्लग्नसुतास्तसंस्थयोः कन्या भवेत्पुत्रवती सुखान्विता।**

**लाभत्रिकोणार्थचतुष्टयस्थितैः सौम्यैः सुपुत्रार्थसुखान्विता भवेत्।।**[26]

**विवाहे अशुभयोगाः**

यदि पापग्रहेण दृष्टः पापग्रहः तथाष्टमभावतः नीचस्थः, शत्रुराशिस्थो वा चेत् विवाहसमये विघ्नः जायते। पुनश्च यदि पापग्रहेण दृष्टः पापग्रहः षष्ठभावगतश्चेत् वरस्य अथवा वध्वाः रोगोत्पत्तेः संकेतोत्पद्यते एवञ्च वरकन्ययोः शुभाशुभम् अभिभावकेन प्रश्नकरणसमये यदि पशु-पक्षि-सर्पादीनां मैथुनं दृश्यते चेत् तदा वधूव्यभिचारिणी इति वक्तुं शक्यते। तथा उक्तं प्रश्नायने –

**नीचार्यन्तेषु पापस्तैर्दृष्टा विघ्नोऽरिगा रुजा ।**

**बन्धुभिर्वा रते व्यादेर्दृष्टे जारवती वधूः।।**[27]

यदि प्रश्नकुण्डल्यां पापग्रहेण युतः चन्द्रः अष्टमभावगतः अथवा षष्ठभावगतश्चेत् विवाहात् अष्टमे वर्षे दम्पत्योः मृत्युर्भवति। यदि षष्ठाष्टमभावगतपापयुक्तचन्द्रात् षष्ठाष्टमे वा भौमश्चेत् विवाहात्परं नवमवर्षे निःसन्तानं मृत्युर्भवति। यदि चन्द्रः अथवा भौमः लग्ने अथवा सप्तमे भवति चेत् विवाहात्परं एकवर्षाभ्यन्तरे (प्रश्नमार्गे सप्तममासे इति उक्तमस्ति) दम्पत्योः मृत्युर्भवितुमर्हतीति ।

प्रश्नलग्नात् सप्तमस्थाने यदि राहुः शुभग्रहेण युक्तः दृष्टो वा भवति तथा च केन्द्रत्रिकोणाष्टमस्थानेषु अन्यतमे स्थाने स्थितः चन्द्रः पापग्रहेण इत्थशालयोगं करोति चेदथवा सप्तमेशः अष्टमस्थानगतश्चेत् विवाहयोगो नास्तीति वक्तव्यम्।यदि यामशुक्रः अथवा कर्मेशः आरूढराशितः षष्ठे, अष्टमे अथवा द्वादशभावे तिष्ठति चेत् विवाहः न भवति। एवञ्च यामशुक्रात्

शुक्रः द्विर्द्वादशे षडष्टके वा भवति चेत् विवाहः न भवति । यामशुक्रः, शुक्रः एवञ्च लग्नेशस्य च युतिः भवतु अथवा एतेषां सम्बन्धः राहु–केतु–गुलिकैः सह भवति चेत् विवाहो न भवति ।

प्रसङ्गेऽस्मिन् प्रश्नवैष्णवे अशुभयोगाः कथिताः यथा –

**सुखे शुभैर्द्यूनगतैश्च पापैः जीवे धृता स्त्री न विवाहिता शुभा।**

**पापग्रहैर्बन्धुकलत्रसंस्थैः धृतोपनीता वनिता म्रियेत।**

**पृच्छा विलग्नादथ जन्मलग्ने द्यूनेऽशुभैर्दृष्टियुतस्य राहो।।**[28]

यदि चतुर्थभावे शुभग्रहः तथा सप्तमभावे पापग्रहः अथवा गुरुः तिष्ठति चेत्तदा पुरुषः धृतास्त्रीप्राप्तिं करोति विवाहितां स्त्रीलाभं न। यदि तृतीये सप्तमे पापग्रहाः स्युस्तदा धृतास्त्री वा विवाहितास्त्री पञ्चत्वं प्राप्नोति। प्रश्नलग्नात् वा जन्मलग्नात् सप्तमभावः शुभदृष्टिरहितः राहुयुक्तः अशुभग्रहैः दृष्टश्चेत्तदा स्त्रीमृत्युर्जायते।

विवाहप्रश्ने कन्यायाः गुणधर्मप्रकृत्यादीनां विचारोऽपि क्रियते। तत्र स्त्री यदि व्यभिचारिणी कुलटा दरिद्रा मङ्गलदोषयुक्ता पुंश्चली च भवति चेत् तदा वरकन्ययोः पारिवारीकजीवने नैके दुःखकष्टाः जायन्ते। अतः पृच्छकः यदि एतत्सम्बन्धिप्रश्नं करोति। यथा – इयं कन्या शुद्धा न वा? इयं स्त्री साध्वी पुंश्चली वा? इत्यादि प्रश्ने सति नैके योगाः द्रष्टव्याः यथोक्तं प्रश्नवैष्णवे –

**कुर्यात्कुजे लग्नकलत्रसंस्थे स्वक्र्षोच्चगेऽयर्थयुता च रण्डा।**

**पापैः सुतस्थैः सुतवर्जिता स्यात् लग्ने कलत्रे कुलटा शनौ स्त्री।।**

**लग्नास्तरन्ध्रगैः पापैः विधवा व्ययगतैः खला।**

**पुत्रस्थैरसुता नारी दरिद्रा धनबन्धुगैः।।**[29]

यदि लग्ने वा सप्तमभावे मङ्गलः स्वराशौ(मेषराशौ वा वृश्चिकराशौ) वा स्वोच्चे (मकरराशौ) तिष्ठति चेत्तदा कन्या धनयुक्ता रण्डा भवति। प्रश्नकुण्डल्यां यदि पापग्रहाः पञ्चमभावे स्थिताः शुभदृष्टिरहिताः स्युस्तदा कन्या सन्ततिहीना भवति। यदि लग्ने वा सप्तमभावे शनिः पापग्रहेण युक्तः दृष्टश्च स्थितः स्यात्तदा स्त्री कुलटा भवति। यदि कन्याविवाहप्रश्ने प्रश्नकुण्डल्यां लग्ने सप्तमे अष्टमे च पापग्रहाः स्थिताः भवेयुस्तदा स्त्री विधवा भवति। यदि शुभदृष्टिवर्जिताः पापग्रहाः द्वादशे पञ्चमे च स्युस्तदा कन्या सन्ततिहीना, द्वितीये तृतीये पापग्रहस्थिते स्त्री दरिद्रा भवति। अथ इयं कन्या शुद्धा न वेति प्रश्ने कथ्यते यथा –

**स्थिरोदये शीतगुलग्ननाथौ स्थिरर्क्षगावक्षतयोनिरङ्गना।**

**चरोदये चन्द्रविलग्ननाथौ चरस्थितौ स्याद्रमते कुमारिका।।**

**चरोदये शीतकरे द्विदेहे स्यादल्पदोषः सुकुमारिका स्यात्।**

**चन्द्रेक्षितौ शुक्रकुजौ च केन्द्रे कन्या सदोषा कुरुतेऽलिगौ च।।**

**हित्वा स्थिरं चन्द्रकुजेत्थशाले परेण गुप्ता रमिता कुमारी।**

**चन्द्राऽर्कसुन्वोरुदयस्थयोः स्यात् परेण कन्या प्रकटाऽपि भुक्ता।।**

**लग्नाधिनाथेन हिमांशुना वा यदीत्थशालं कुरुते महीसुतः।**

**भजत्यवश्यं स्वगृहेऽन्यमेषा स्वक्र्षे कुजे याति तदीयमन्दिरम्।।**

**यामित्रनाथे बहुखेटसंयुते भवन्ति जाराः बहुभिस्तु योगतः।**

**भावीत्थशाले स्मरपस्य भाविनः त्यक्ता तया द्यूनपतेसराफात्।।**[30]

प्रश्नकुण्डल्यां यदि स्थिरलग्नं स्यात्तथा स्थिरराशौ चन्द्रलग्नेशौ भवेतां तदा कुमारी अक्षतयोनियुक्ता भवति। अस्य विपरीते विपरीतफलम्, तद्यथा – चरलग्ने चरराशौ लग्नेशे चन्द्रे च स्थिते सति सा कुमारिका यौवने रमते अर्थात् सा कन्या क्षतयोनियुक्ता भवति। यदि प्रश्नकुण्डल्यां चरलग्नं स्यात्तथा द्विस्वभावराशौ चन्द्रः स्यात्तदा कुमारिका अल्पदोषयुक्ता भवति। यदि चन्द्रः द्विस्वभावराशौ स्थितः तस्योपरि केन्द्रे स्थितयोः शुक्रभौमयोः दृष्टिः भवेत्तदा कन्या अधिकदोषयुक्ता भवति। यदि वृश्चिकराशौ शुक्रः तिष्ठति एवं भौमस्योपरि चन्द्रदृष्टिः स्यात्तदा कन्या दोषयुक्ता भवति। यदि द्विस्वभावराशौ वा चरराशौ चन्द्रभौमौ इत्थशालयोगान्वितौ स्यातां तदा कन्या गुप्तरूपेण परपुरुषेण साकं रमणं करोति। यदि शनिचन्द्रौ लग्ने स्थितौ भवेतां तदा कन्या परपुरुषेण साकं रतिं करोति। यदि लग्नेशस्य चन्द्रस्य वा इत्थशालयोगः भौमेन साकं भवति चेत्तदा स्त्री स्वगृहे परपुरुषमाह्वयति। तत्र भौमः यदि इत्थशालयोगे स्वराशिगतः स्यात्तदा कन्या परपुरुषगृहे स्वयं गच्छति। यदि सप्तमेशः बहुग्रहैः साकं तिष्ठति चेत्तदा कन्यया बहुपुरुषेण रमणेन जाराः जायन्ते। यदि सप्तमेशः ईसराफयोगान्वितेन ग्रहेण साकं तिष्ठति चेत्तदा कन्या त्यक्ता भवति। परस्परस्नेहप्रश्ने स्त्रीपुंसयोः प्रीतिर्भविष्यति न वेति प्रश्ने कथ्यते यत् –

**लग्नेशयामित्रपतीत्थशाले स्नेहो भवेत्स्त्रीनरयोरतीव।**

**सुस्नेहदृष्ट्या च तयोः शशाङ्कः कम्बूलयोगे शुभयोः शुभं स्यात्॥**

**लग्नस्थिते द्यूनपतौ स्वभर्तुः आदेशकर्त्री वनिता सदा स्यात्।**

**जायास्थिते लग्नपतौ स्वनार्या आदेशकारी पुरुषः सदैव॥**

**लग्नेश्वरो लग्नगतः स्मरेशो जायास्थितो द्वावपि लग्नसंस्थौ।**

**यामित्रगौ तावथ भर्तृवध्वोः प्रेमातिरेकं कुरुतः प्रकर्षात्॥**[31]

प्रश्नकुण्डल्यां यदि लग्नेशसप्तमेशौ इत्थशालयोगान्वितौ भवेतां चेत्तदा स्त्रीपुंसयोः प्रीतिर्भवति। यदि लग्नेशसप्तमेशौ मित्रग्रहैः शुभग्रहैश्च दृष्टौ स्यातां तथा चन्द्रः कम्बूलयोगान्वितः स्यात्तदा स्त्रीपुंसयोः वैवाहिकजीवनं सुखमयं भवति। यदि सप्तमेशः लग्ने तिष्ठति चेत्तदा स्त्री सदैव पत्याज्ञा पालयति। यदि लग्नेशः सप्तमभावे तिष्ठति चेत्तदा पुरुषः पत्न्याज्ञा पालयति। यदि लग्नेशः लग्ने एवं सप्तमेशः सप्तमे स्थितः अथवा द्वौ लग्नेशसप्तमेशौ लग्ने स्थितौ अथवा द्वौ सप्तमभावे स्थितौ स्यातां तदा पतिपत्नीमध्ये परस्परं प्रेमातिरेकं भवति।

**सन्दर्भग्रन्थाः**


1. षट्पञ्चाशिका,दैवज्ञपृथुयशो,चौखम्भा संस्कृत संस्थान,वाराणसी,संस्करणम्–2009
2. प्रश्नवैष्णशास्त्रम्,श्रीसिद्धनारायणदासः,खेमराज श्राकृष्णदास श्रीवेंकटेश्वर बम्वई प्रकाशन–1987
3. प्रश्नभूषणम्, दैवज्ञश्रीजीवनाथः,चौखम्भा संस्कृत संस्थान,वाराणसा, संस्करणन्–1999
4. प्रश्नशिरोमणि,पण्डितरुद्रमणिविरचितः, खेमराज श्राकृष्णदास श्रीवेंकटेश्वर बम्वई, संस्करणम्–2005
5. षट्पञ्चाशिका,दैवज्ञपृथुयशो , बी.के.पब्लिकेशन प्रा.लिमिटेड,भुवनेश्वर संस्करणम्– 2012
6. गणतरङ्गिणि,सुधाकरद्विवेदी,शिव संस्कृत संस्थान, वाराणासी, संस्करणम्– 2002
7. भुवनदीपकः,सत्येन्द्र मिश्रः,चौखम्बासंस्कृतप्रतिष्ठानम्, वारणासा।, संस्करणम्–2002
8. बृहज्जातकम्, वराहमिहिराचार्यः, चौखम्बासंस्कृतप्रतिष्ठानम्, वारणासी, संस्करणम् – 2009
9. फलदीपिका, मन्त्रेश्वराचार्यः, रञ्जनपब्लिकेशन्स, नईदिल्ली, संस्करणम् – 2009
10. जातकाभरणम्, श्रीढुण्ढिराजः, चौखम्बासंस्कृतभवनम्, वारणासी, संस्करणम् – वि.स. 2069

**सन्दर्भ-**


1.प्र.मा.अ20.2

2.मु.चि.वि.प्र 1

3.प्र.मा.अ17.6-7

4. प्र.अ.अ7.1

5. प्र.मा.17.8-9

6. प्र.अ.7.7

7. प्र.मा.17.2

8. प्र.अ 7.2

9.प्र.मा17.10-11

10. प्र.अ 7.4

11. प्र.अ.7.5

12. प्र.मा.17.16

13. प्र.मा.द्वि.अ.,श्लो.28

14.प्र.मा.द्वि.अ.2, श्लो.29-30

15. प्र.अ.अ.7.16

16. प्र.अ.अ.7.6

17. प्र.मा.अ.17.26

18. प्र.भू.अ.7 श्लो.1-2

19. प्र.भू.सप्त.अ.श्लो.3

20. प्र.भू.सप्त.अ.श्लो.5-6

21. प्र.अ.अ.7.19

22. प्र.अ.अ.7.21

23. जा.पा.अ.14.28

24. प्र.अ.अ.9.36-41

25. प्र.वै.अष्ट.अ.श्लो.6-7

26. प्र.वै.अष्ट.अ.श्लो.8

27. प्र.अ.अ.7,श्लो.7

28. प्र.वै.अष्ट.अ.श्लो.4

29. प्र.वै.अष्ट.अ.श्लो.9-10

30. प्र.वै.अष्ट.अ.श्लो.14-18

31.प्र.वै.अष्ट.अ.श्लो.19-21